Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# परिभाषानिसरनस्थानकृत आन्तर्यस्य बलीयस्यश्च विमर्शः

डॉ. जगदीश प्रसाद जाटः
(वैयाकरणशास्त्र विशारदः) प्राचार्य,
गुरुकुल शिक्षा समिति, मौजमाबाद,
जयपुर, राजस्थान, भारत।



**Article Info**
Volume 3, Issue 5
Page Number: 196-211
**Publication Issue :**
September-October-2020
**Article History**
Accepted : 10 Sep 2020
Published : 20 Sep 2020

**सारांशः**– अवयवसमूहरूपत्वान् मिदेः । अथ गुणविधाविक परिभाषाभावे तस्यानिग्लक्षणत्वात्। चितं स्तुतं भिन्न छिन्नमित्यादौ क्ङिति चेति निषेधो न स्यात् । नैष दोषः । क्नुक्नुकनो क्तोश्च कित्कारणं ज्ञापकमनिग्लक्षणयोरपि सार्वधातुकादि लघूपधगुणयोर्निषेधो भवतीति। धातुप्रत्ययो कित्वं कृत्वं सजातीयत्वात् धातुप्रत्ययनिमित्ते एव गुणवृद्धि निवर्तयति।

**मुख्यशब्दः**– परिभाषानिसरनस्थानकृत, आन्तर्यस्य, बलीयस्यश्च, परिहारः, विमर्शः।

**परिभाषानिसरन आक्षेप विमर्शः ।** किञ्च सर्वेषामेष परिहारः। इतो सर्वनामस्थान इतीत्[1] ग्रहणं ज्ञापकं स्वसंज्ञया विधान एवेक् परिभाषोपतिष्ठते। नान्यत्र पूर्वसूत्रद्वयानुवृत्याप्ययमर्थः सिध्यतीत्यपि प्रागुक्तं तदर्थं गुणवृद्धिग्रहणं न कर्तव्यमिति स्थितम् । अथ किमर्थमियं परिभाषारभ्यते। गुणवृद्धयोरिक्पदोपस्थाने न स्थानिनियमो यथा स्यात्। नैतदस्ति प्रयोजनमिह तावत् ह्रस्वस्य गुणः[2], जसि च[3], घेर्डिति ऋतोङिसर्वनामस्थानयोः, ओर्गुणः[4], ऋतश्च संयोगादेः, गुणोर्तिसंयोगाद्योः उरङि गुणः इत्यादौ ह्रस्वादिना गृह्यमाणे नाङ्गस्य विशेषणात् स्थाने स्थानि अनपायादलोन्त्यपरिभाषायां यस्येक एव गुणो भविष्यति न हे अग्निर्वित्यात्दौ पुगन्तलघूपधस्य गणोऽपि अन्तः लध्वी उपधेति तत्पुरुषाश्रयणादन च तद् विशेषणादकोऽपीत्यादाविक एव सिद्धः । एवं मिदेर्गुणोऽपि मिद इनिरिरितीकत्वात् । ऋच्छति गुणोऽपि अकारान्तरप्रश्लेषाद् वृत्तेनुरेव भविष्यति।

दृशेरपि योगविभागात्सिद्धम्। उरङि गुणः ततो दृशे उरित्येव । क्षिप्रक्षुदयोरपि योरपि योगो विभज्यतेस्थूल इग्युवरयुव ह्रस्वानां यणादिपरं यणश्चादिर्यणादिः यणादेः परं यणादिपरमिति पञ्चमीसमासः एषां यणः आदिभूतावर्णात्परं शब्दरूपं लुप्यत इत्यर्थः न चैवं ह्रस्वशब्दे हकारान्त्य तस्य ह्रस्वशब्दस्य लोपप्रसंगो विप्रतिषेधाश्रयणात्सकृत्प्रवृत्या चरितार्थस्य पुनः प्रवृत्यभावाच्च।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

न चाक्षरसमाम्नायेन फलस्यैव परत्वात्तदानेनैव लोपः सूक्तं वाच्यम् । प्रयोगश्रुतवर्णपाठापेक्षयैव शब्दपरविप्रतिषेधस्य प्रसिद्धेः । अन्यथा पब्धामृधेत्यत्र भाष्योदाहृतः स बाध्येत वर्णपाठे तु मस्यैव परत्वात् । तदेवं परस्य यणादेर्लोपे कृते पूर्वस्य च गुण: कस्मात्पूर्वस्य अर्थाद्यण आदेर्वर्णात्यकारात् वकाराच्च पूर्वस्येति गम्यते । एतदेव च पूर्वग्रहणस्य प्रयोजनम् । एवञ्च जसि गुणादिरन्त्यस्य मिदि गुणादिस्त्वन्त्यस्ये क एवेति सिद्ध मिष्टम् । स्यादे तत् । सार्वधातुकादिगुणोगी[5]त्यस्य भवन्नन्त्यस्य विशेषितत्वादनिकोऽपि स्यात् । याता वाता ग्लायति इहिता उम्भितेत्यादौ एवं ङसि गुणोऽपि इहापि स्यादनेनिजुः पर्यवेविमुरिति।

अत आत्सन्ध्यक्षरव्यञ्जनानां मा भूदिति गुणविधाविक इतिवत् कृत्यम् । नैतदस्ति प्रयोजनं ज्ञापकासिद्धं यदयमातोऽनुपसर्गे क[6] इति ककारमनुबन्धं करोति तत् ज्ञापयति नाकारस्य गुणो भवतीति यदि स्यात् नैवैनं कुर्यात् आकारस्य गुणेऽकारे कृते द्वयोरकारयोः पररूपेव सिद्धं गोदः कम्बलदः इति । मैवमुत्तरार्थमेतत्स्यात् । न तुन्दशोकयोः परिमृजापनुदोरिति। एवं तर्हि न्यायो वृकः कित्वं ज्ञापकमन्यथा पूर्ववद्गुणे द्वयोः पररूपेव सिद्धः स्यात् सागम इति। अत्र केचित् सामगायेत्यादावेवादेशस्य पूर्वान्तत्वेन ग्रहणादातो धातोरिति लोपः स्यात्।

न च पररूपात्परत्वादाऊत्वाच्चातो लोपप्रसङः । आर्धधातुकोपदेशस्य पूर्वान्तत्वेन ग्रहणाद् यदकारान्तं तस्यातो लोप विज्ञानात् । अन्यथागत इत्यादावपि स्यादिति चेत् । अत्रोक्तं कैयटेन सन्निपातपरिभाषया लोपो[7] न भविष्यति। अकारं व्याश्रित्यनिपातनाद् भवतीति नव्यास्त्वाहुः। धात्वधातुसमुदायस्याकारो न त्वाद्धातोराकारोतत्वाभावाद् लोप प्रसङ्ग एव नास्ति । यथाश्रुमप्यकुलायेत्यत्र क्विबन्तेऽस्ति प्रसंग।

न चैकादेशस्य पूर्वगतित्वेन ग्रहणादित्युक्तयुक्तिमत् खट्वाभिरित्यादाविव छन्दो गायेत्येकादेशान्ते पूर्वव्यपदेशनिबन्धनस्य प्रवर्त्यस्य कार्यस्याभावात् इति । तदप्रेक्षिताभिधानं ब्रह्म च भूरित्यत्रापि प्रातिपदिकाप्रातिपदिकसमुदायस्य प्रातिपदिकत्वेन सुबुत्पनापत्तेः । नन्वेतदर्थमेवांतादिवभाव आरभ्यते । प्रातिपदिकग्रहणाग्रहणं यथा स्यादिति कथ चैतद् भवति एकादेशस्य पूर्वान्तत्वेन ग्रहणात्। तर्हि सामगायेत्यत्रापि एकादेशस्य पूर्वान्तत्वेन ग्रहणाददन्तस्य धातुत्वेकानुपपत्तिः । तथा च तस्यैव सुपि चेति[8] दीर्घ कृते एकदेशविकृतन्यायेन धातुश्चादन्तश्चासौ भवतीति कथं नामो लोप: स्यात् । यत्तूक्तं- ब्रह्मवं भूरित्यादाविवेहैकादेशान्ते पूर्वव्यपदेशनिबन्धनस्य प्रवर्त्यस्य कार्यभावादिति । तदप्यसत्। आतो लोपस्याप्येकादेशान्त एव प्रवर्तनात्। नैकादेशो दीर्घ इति चेत् । किमेतावता आतोरादन्तत्वं विहन्यते।

न चैकादेशेऽविकृत एवान्तादिवद्भावो भवति तर्हि दन्ते राजा ज्ञापयति। आश्रीयमाणं पूर्वं प्रत्यन्तवदित्युक्तत्वात् । आश्रितश्चात्र धातुलोपं प्रति निमित्तत्वेन तस्य एव निर्दिष्टे तन्मात्रस्य वा विकृतस्य वास्तु कार्य न तत्राग्रहः । न हि दृष्टान्ते तथा न दृष्टमित्येता लक्षणं संलोचमर्हति । यावद् वचनं वाचनिकमिति न्यायात् । अन्यथा देवताब्रह्म वंधूव नास्तीत्यादन्ते नैतत्प्रवर्तत इत्यप्युच्येत।

यदप्युच्यते:- सन्निपातपरिभाषया समाधानमप्ययुक्तम। अकारलोपे य शब्दस्यानिमित्तत्वादिति। तदप्यसत् । या देशे हि विशिष्टं निमित्तं हस्वत्वमत्वं च अत इत्यनुवृत्तेः । तत्र यद्यपि दीर्घेण हूस्वरूपं निवर्तितं अत्वं तु तदनुगतमिहाप्यस्ति तदप्यातो लोपे न निवर्तनीयं चेद् भवति

य शब्दो निमित्तं सन्निपात परिभाषा तत्र यथा दीर्घ णत्वा विधाने ऽपि हु स्वत्व विधातान्निमित्तविधातः शंक्यते । एवमातो लोपेऽपि ह्स्वविघतेप्यत्वविधानान्निमित्त विधान उच्यते। विशेष्योभयात्मकत्वाद् विशिष्टस्यान्यतरनिवृत्यापि विशिष्टनिवृत्तेर्दृष्टत्वात्।

किञ्च दीर्पण निवृत्तावस्यादेशद्वारा स एवानुवर्तत इति व्यपदिश्यते स्थानिन्यकारे दृष्टस्यात्वस्यादेशेऽपि प्रत्यभिज्ञानात्। तस्यापि चेदातो लोपः स्यात् वान्त्येति क एवोच्छेदोकारस्य कृतः स्यात् । प्रत्यभिज्ञा हेतोः कस्याप्यंशस्य दर्शनात् । ह्रस्वद्वयसंघात एव दीर्घ इति तु दर्शने आतो लोपे न इस्वद्वयमेव निवर्तते। ह्रस्वश्च य शब्दस्य निमित्तमिति स्पष्ट एव निमित्तसन्निपातविधातः । अन्येत्वाहुः । कप्रत्ययसन्निपाताश्रयं यत्वं स्थानिवद्भूतादशलोपस्य निमित्तमिति । यदप्युक्तं सन्निपातपरिभाषा नित्याचेद् दीर्घेणापि न भाव्यम्। अथानित्या तातो लोपोऽपि स्यादिति। नदपि तुच्छां दीर्घप्रत्येव ज्ञापकदर्शनादनित्यत्वं नान्यं प्रत्यपीति कैयटेनैव स्पष्टमभिधानात् । अत्र चार्थेऽनन्यार्थतां टकः कित्वस्य च वदन् भाष्यकार एव प्रमाणम्।

एतेन शुभंया[9] शब्दस्य नपुंसके ह्रस्वे च डेर्यादेशे दीर्घ च सत्यातो धातोरित्यालोपे च शुभंय्येति भवतीति वदन् माधवोऽपि प्रत्युक्तः। यदप्युच्यते परमार्थतस्तु सन्निपातः संश्लेषस्तन्निमित्तो यो विधिसतत् विधातस्यातं सन्निपात यो विहन्ति तस्य विधेरनिमित्तमिति परिभाषार्थात् छन्दो गायेत्यत्रात्वमेव न स्यात् । तस्यैव सन्निपातविघात[10] कालोप्यनिमित्तत्वात्। य शब्दनिमित्तकत्वाच्च यथा शातानीत्यत्र षट्संज्ञा न भवति इयेषेत्यत्र वाम् इति। तदप्यनतिरिक्तार्थ तथा हि यद्यकारसंश्लेषनिमित्तो विधिर्यशब्दः सगकारसन्निपातं यो विहन्ति विधिरात्वं तस्य निमित्तमित्यत्वं नैव स्यादभिमतं तदेतन्न पूर्वमुच्यते कैयटादिभिरेवापादित्तवात् । कष्टायेति ज्ञापकेनपारेहतत्वाच्च। किञ्च वस्यैव सन्निपातविघातलोपनिमित्तत्वादिति हेतावपि यदि तस्यैवेत्यनेन सन्निहितयात्वमेव परामृष्यते तदा विशेषण सिद्धिः । न ह्योलोपोऽकार सन्निपातं विहन्ति दीर्घेणैव तस्य प्रागेव निवृत्तत्वात् । अथ सन्निहितसन्निपातविघातकत्व माकारस्य विशेषणं न लोपस्य ततश्चायमर्थः आकारोकारं सन्निपातविघातको य आकरस्तस्य यो लोपस्तन्निमित्तमित्याकार एव न स्यादिति मतं तालोप निमित्तत्वादिति अयं विशेष्यत सन्निपातविघातकलोपनिमित्तत्वादिति।

तदपि न कार्यिणे निमित्तत्वविरोधात् । अन्यथाशेत इत्यत्र क्ङितिचेति गुणनिषेधापत्तेः[11] किंञ्च यकारस्य हि सन्निपातः किं य शब्देनोताकारेणैव नाद्यः य शब्दस्याकार सन्निपात लक्षणत्वसम्भवात् । तद् विघातस्येति तच्छब्देन विधिशब्दोपस्थायि स य शब्दसन्निपातस्य सङ्तं सिद्धसिद्धि व्याघातादेव।

किञ्चातोलोपे अ च परामर्शात् । न द्वितीयः आकारस्याकार सन्निपातलक्षणत्वाभावात्। सिद्धसिद्धिव्याघातात् अथोच्येत य शब्दसन्निपातकृतो विधिनात्वं तद्यथा शब्दाकारसन्निपात विघातकस्यातो लोपस्यानिमित्तमिति । ताकार एव न स्यादित्यापादनमसतम्। सिद्धसिद्धिव्याघातादेव । किञ्चातो लोपे आकारः कार्यं न च कार्यानिमित्तमित्युच्यते । तथा हि सति शेते इति क्डि.ति चेति गुणनिषेधः प्रसज्येत[12]। तत्र कथमनिमित्त तद्विघातस्येत्येतत्प्रयोजनम्।

न च निमित्तशब्दः प्रयोजकपरः अन्यैस्तथानभिधानात् । अथापि कथञ्चित्स्यात्। तर्हि सिद्धं न समीहितं उपपन्नतरमेतत्सन्निपातपरिभाषया लोपो न भविष्यतीति कैयटे दूषणमलग्नकम्। तथा च सन्निपातपरिभाषया समाधानमप्युक्तमित्येवायुक्तम् अन्ये त्वाहुः सामग अ इति स्थितेऽन्तरत्वात् पूर्वरूपे वान्तादिवत्भावात्पूर्वमेव वार्णादाङ्गं बलीय इति।

डेर्यादिशे दीर्घ च कृतेप्यातो लोपो न प्राप्नोति वातोरादन्तत्वाभावात् । न चान्तवभावात्प्राप्तिः दीर्घस्यैकादेशत्वाभावात् । दीर्घात्पूर्वं चान्तवभावो न प्रवर्तते संज्ञापरिभाषावत्कार्यार्थत्वेन न कार्यकालत्वाददतिदेशस्य तदानीं च कार्याभावादकारान्तत्वात् । इति। तन्न। दीर्घ कृतेऽपि तस्य स्थानिवद्भावेनैकादेशत्वादन्तवद्भावसम्भवात्।

न च आदेशत्वमच्चिविधिः । यदा तु यथोदेशपक्षस्तदानपेक्ष्यैव प्रयोजनमन्तवद्भावे कृतेऽपि प्रान्यूह एवातो लोप इति । तस्मात्सन्निपातपरिभाषया न भवतीत्येतदेव ज्यायः । अथ ग्लायतीत्यादौ सन्ध्यक्षराणां गुणो मा भूदिक परिभाषारन्वव्येति चेत् । न ग्लै[13] ग्लै इत्यैजुपदेशो ज्ञापयति न सन्ध्यक्षरस्य गुणो भवतीति। अन्यथा प्रक्रिया नाद्यवार्थ इत्येवोपक्षिशेत् । यद्येवमापादयोऽपि न स्युः नैवं यं विधिं प्रत्युपदेशोऽनर्थक सुप्विधिर्बाध्यते । यस्य तु विधेः निमित्तमेव नासौ बाध्यते गुणञ्च प्रत्युपदेशोऽनर्थकः आयादीनां पुनर्निमित्तमेव । तमन्तरेण ग्लायतीत्यसिद्धेरिति न ते बाध्यते।

नुन यद्ययादयः स्युः तर्हि ग्लाय् इत्येवोपदिश्येत । मैवं तथा सति त्वया ग्लायत इति रूपं न सिध्येत् यलोप सम्भवात् ।

किञ्चैवमेकाजजन्तत्वाभावात् । ग्लातेत्यादाविट् प्रसड़ा । तुल्य नोपदेशेष्वेते पठिष्यत इति तन्न । अग्लासिष्टामित्यसिद्धेः । अतादन्तत्वेन सगिटोरसंभवात् । यमरमनमातां सक्चेत्युक्तौ[14] त्वपसिष्टसिद्धेः। तस्मादुपदेशसामर्थ्याद् गुण न भवतीत्येव ज्यायः । नन्वेवमादेच इत्यात्वमपि बाध्येत न य्जुपदेश आत्वस्य निमित्तं ग्लै इत्युपदेशोऽपि तस्य सुकरत्वात् इति। विवरणकृतोक्तोः ।

यत्तु प्रज्ञाचक्षुराह । नैतदेवं ग्ले इति पाठे ग्लायतीति रूपासिद्धिप्रसङ्गत् । द्विमात्रत्वाविशेषात्प्रक्रियालाघत्वे विशेषाभावाच्चैकारपाठस्य उपपत्तेरिति तदाशया ज्ञानाविजृम्भितम् । एवं हि स मन्यते । यदि सन्ध्यक्षराणामुपदेशसामर्थ्याद् वृणोत भवतीत्युच्यते तात्यसपि न स्यात्। डि.ति गुणनिषेधेत्यात्वेनापहृतत्वेनैव श्रवणासंभवात्। न चात्वसिध्यर्थमचैजुपदेशः एकारपाठेनापि तत्सिद्धेः। यत्तु तदुक्तं ग्लायतीति रूपासिद्धिः स्यादिति । तदसत् कृतेप्यैजुपदेशे गुणो नैकारेयादेशे च ग्लयतीत्येव रूपेण नित्यं भवितव्यं न ग्लायतीति तत्र चावश्यकत्वादेकार एवोपदिश्यतां एवञ्च प्रक्रियालाघवमपि भवति । अन्यथा[15] ऐकारमुपदिश्य तस्य गुणेन एकारं संपाद्य तस्याचादेशे क्रियमाणे गौरवापत्तिः ।

यदपि स्वयं परिजहार[16] यद्यैच आत्वं स्यादाकारमेवोपदिशेत्। न चैवं ग्लायतीति रूपासिद्धिः। श्यन् व्यत्ययेन सिद्धे यथादावेवायं त दैवास्तीति भाष्ये दापयतीति सिद्धिः नन्वेवमादैच उपदेशेऽशिती[17]त्यनर्थकं तथा चोपदेशसूत्रप्रामाण्यन्यथानुपपत्या विकल्पः स्यात्तथा च न व्याख्येति कैयटोक्तज्ञापकानुपपत्तिरितिचेन्न। सूत्रस्यैव खण्डने शो तंनूकरणे षान्त कर्मणीत्यादौ चरितार्थत्वात्।

न च तत्राप्यु पदेशसामा दात्वाभाव इति वाच्यम्। द्यतीत्यादावोकारोपदेशस्य लोपार्थत्वात्। ओतः[18] श्यनीत्याकारोपादानेन तद् विधानात्। न चातः श्यनीत्येव वक्तुं युक्तम् श्यन् व्यत्ययपक्षे दापतीत्यादेरसिद्धिसिङ्गत्।

नन्वेवमादो त उपदेशे इत्येव वदेकिमेच् ग्रहणेनेतिचेत्[19]। न। प्रत्याहारग्रहणस्य धेट पाने ज्योङ् नियमव्रतादो दोऽवखण्डने इत्याद्यर्थत्वात्। न चात्रोपदेशसामर्थ्यम्।

धयति ज्यवते द्यतीत्यादिरूपसिध्यर्थत्वात् । एवं तह्यदेङ् उपदेश इत्येक ग्रहण एव कर्तव्ये एच इति वचनादैकारोप्यात्वनिमित्तमिति चेत् । ऐजुपादानस्य मीनातिमिनोतीत्यत्र दापयतीति मापयतीत्येतदर्थत्वात् । तथा चैकारो नात्वस्य निमित्तमित्यात्वं वा बाधेतेति। तदप्यसत्। यत् तावदुच्यते :- ग्लायतीति श्यन् व्यत्ययेनेति। तदयुक्तं छन्दसि हि व्यत्यय उक्तः स भाषायां कथं स्यात्। दापतीत्यत्र तु भाष्यकारवचनाद्भवतुनाम्।

न चेह तथा वचनमस्ति। अथ मतं दिवादिषुपाठः कर्तव्यः इति तर्हि गै शब्देपैओ वै शोषण इत्येतावपि यद्यादन्तौततस्तयोः श्यनि गायति पायतीत्यत्र घुमास्थेतीत्वं[20] स्यात्। पयतेश्चादन्तपाठेरिवादेश शप्रत्ययः सिञ्लुकोपि स्युः। अथैतो न श्यनन्तौ। तर्हि गायतीत्यादिव सिध्येत्। अथैतावेदन्तौभोवादिको तर्हि गुणः स्यात्। अथैजुपदेशसामर्थ्याद्गुणभावः तात्वमपि गाता पातेति न स्यात् गुणवदेकारपाठेनाप्युपत्तेः। अथापि कथञ्चिदात्वमत्रेष्यते तेषु कथमादेच इत्यैजुपादानमुत्तरार्थाकृतमिहार्थत्वस्यैव सम्भवात्।

यत्तु केचिदाहुः- नैचः आत्वेन भाव्यं परत्वाद्गुणप्राप्तेः । न चात्वं नित्यम्। अनैमित्तिकमात्वं शिति तु प्रतिषेध इत्युक्तेरात्वस्यान्तरकृत्वाद्गुणात्पूर्व प्रवृत्तेः किञ्च यदप्युत्तरार्थमित्युक्तम्।

तदप्यसत्। मीनाति[21] सूत्रे हि नैचः स्थाने आत्वमुच्यतेऽपित्वेनिमित्ते प्रत्ययेवि वक्षिते।

उपदेशावस्थायामेवान्त्यमात्रस्यात्वं विधीयते। अन्यथा दापो वर्तते इत्यादौ भावे घनं बाधित्वा एरच् स्यात्। ईषदवदानः स्ववदान इत्यातो युच्च न स्यात्। अवदाय इति श्यन्व्यधेति न स्यात्। यत्तु घुसंज्ञाभाष्ये उपक्षये इत्यत्रोक्तेः अकारान्तानामेजन्ताः प्रकृतयः एजन्तानामपीकारान्ताः।

न च प्रकृतिप्रकृतिप्रकृतिग्रहणेन ग्रह्यत इति। वार्तिककृतो मतमेतावत्। यत्वात्विकमिति तत्रैव स्थितम्। एवञ्च एङ् निमित्ते प्रत्यय इत्युच्यमानेऽपि दापयति मापयतीत्यात्व सिध्यत्येव णिचो गुणं प्रत्यपि निमित्तत्वात्। वृद्ध्यागुण बाधनेऽपि गुणनिमित्तत्वानपायात्। न ह्यत्र कुर्वद् रूपं निमित्तत्वानपायात्। न येवमप्यसंभवादुपदेश एवात्वविधानात्। किन्तु योग्यतारूपं तच्च गुणं प्रत्यप्यस्ति।

न च परिकल्प्यर[22] चेति न्यायादपवादविषयम् उत्सर्गस्य गुणस्य योग्यतापि नास्तीति युक्तम्। कार्याभावस्यान्य हेतुकत्वेन[23] योग्यतानपायात्।

अन्यथात्वविषये ऐज निमित्ततापिदुर्लभा स्यात्। न चात्वप्रवृत्तेः प्रागसञ्जातविरौधित्वेनैज् वृद्धिरेवास्ति। गुणवृद्धिस्तु णौ विवक्षिते वृद्धिबुध्यानिवर्तितेति नेङ् निमित्तता शक्यते व्यवसातुमिति वाच्यम्। यतो सौ निवर्त्यते अत एव तद्योग्यतोच्यते न हि

नित्यप्रसक्तेऽत्यन्ताप्रसक्ते वा तद्योग्यतया व्यपदिश्यते इति अथापि अकारान्तानामेजन्ताः प्रकृतयः एजन्तानामपीकारान्ता इति वार्तिक पक्ष आश्रीयेत्। तत्रापि वृद्धौ कृतायामपि पुनः प्रसङ्गविज्ञानाद गुणप्रवृत्तेरवश्यं भावात्।

किञ्च । ग्लायत इत्यादौ द्विवचनादिषु सति शिष्टत्वान्नित्स्वरः प्रसज्जेत् । अथात्र तस्यानुदात्तेदिति ल सार्वधातुकानुदात्तं ल भविष्यति। एवमपि ग्लायमान इति वावश्यनिष्ट स्वरं स्यात् । नन्वन्यत्र विकरणेभ्य इति पर्युदासान्निस्तरेण न भाव्यम्। सत्याम्यतो नित्कारणसामर्थ्यात्पर्युहासो बाधिष्यते। अन्यथानुदात्ते प्रत्यये धातुस्वरेण सिद्धं उदात्संभुतेनैव वातितत्वाच्च नित्वमनर्थकं स्यादिति नित्स्वरे बाधित्वानित्स्वर एव स्यात् । अथ भाष्यकारेण दायतीत्यादौ श्यन आश्रयणादत्र नित्स्वरो न भविष्यतीति चेन्न।

भाष्यकार वचनप्रामाण्यात् तस्य स्वरस्येष्टत्वात्। यथोत्तरं[24] मुनीनां प्रामाण्यात्। अन्यत्र तत्स्वरस्वीकारे प्रमाणाभावात्।

तस्मादादन्तपाठे य सिज् लुक् युक्तः न च श्यन् व्यत्ययोऽपि । न चादेचे शिति गुणो शिति वा तमित्युभाभ्यामैवोपहारान्न क्वचिदप्ययं श्रूयेतेति गुणवदात्वमपि बाधेतेति प्राप्तम् । तत्समाधत्ते स्म कैयटः न व्याख्येति निपातनादात्वं गुणावत्र वाधिष्यते इति। अस्तु तर्हि ऐजुपदेश न व्याख्येति[25] लिअभ्यामात्वविकल्पइत्यत उक्तं निपातनादिति। अनिमित्तानामप्यैचां निपातत्वादेवात्वमित्यर्थः । बाधकान्यपि निपातनानि भवन्ति सर्वनामानीति णत्वाभाववत्। तेन आत्वं भवति न विकल्पेन । गुणे तु तथा निपातनादर्शनायं विधिं प्रतीति न्यायादुत्वं तं स वोच्यते । एवं ध्यायतीत्यादा वैजुपदेशस्यार्थत्वात्सामोपक्षयात्नात्वेपि विकल्प शंकोदय इति भावः।

यत्तु ध्यायते कृतात्वस्य निर्देशात्सामान्येन वा निमित्तमैकार इति ज्ञाप्यत इत्याचक्षते । तदसत् । लिङ्गादात्वमुपदेशसामर्थ्याच्च तदभाव इति विकल्पतयादुपपत्तेरात्वस्यैकान्तिकत्वासिद्धेः निपातनाभिधानवैयर्थ्यप्रसङ्गच्चेति। इद तत्प्रयोजनं व्यञ्ज नस्य गुणे मा भूत् इति हसितेति। हकारस्य कथं स्याकारः भकारस्य चौध्यस्यौ कारः स्यात् तस्य चायादेशे श्रुतेऽनुस्वारपरसवर्णयोर्निवृत्तानुनवितेति स्यात् । नैष दोषः ।

सप्तम्यां जनेर्ड[26] इति डित्करणं ज्ञापकोपजनस्य गुणो भवतीति। यदि स्यात् नकारस्यार्धमात्रिकस्य मात्रिकेऽकारे गुणे कृते त्रयाणामकाराणामतो गुण इति पररूपमेव सिद्धम् । उपसरजो मन्दुरज इति किं टिलोपार्थे न डित्करणे नानच् डकार: श्रवणार्थो स्थितिः वाच्यम् । प्रावृटशरत्कालदिवाज[27] इत्यत्र जनेर्ड प्रत्यये कृत टिलोपस्य निर्देशाल्लिात् ।

ननु नैतल्लिङ जायते कोतस्य ज इति निर्देशोपपत्तेः । अथ कर्मण्युपपदे को विहितः कथं प्रावृषिज इत्यादौ स्यादिति चेत् । एवं तर्हि सुपि च इत्यत्र सुपीति योगविभागाद् भविष्यति द्विपः पापदं इति यथा। सत्यं डकारस्य श्रवणार्थत्वे इत्संज्ञाशास्त्रं बाध्यं स्यात् । न च प्रयोजनाभावः टिलोपार्थत्वात् । न च गुणेन सोऽन्यथासिद्धः । तत एव ज्ञापनफलत्वात्। न चैवं कल्पनागौरवं फलमुखस्य तत्यादोषत्वात् । ननु नकारस्य गुणोऽन्तरतमत्वात्सानुनासिकोकारः स्यान्न चास्य पररूपेण[28] शुद्धिर्भविष्यतीति शङक्यम् । पररूपेणापि सानुनासिकनिरनुनासिककयोः स्थानेऽन्तरतम[29] इत्यनुनासिके नैव भाव्यत्वात् । अत्राहुः- एङि पर इतीयता सिद्धरूपग्रहणस्यैतत्प्रयोजनं यादृशं परस्य रूपं निरनुनासिकमित्यादिकृत्स्वधर्मवत्तादृशमेवैकादेशो यथा स्यादिति।

यत्तु केचिदाहुः- नन्वेङि पर इत्युच्यमानेऽपि भाव्यमानोऽण् सवर्णान्न गृह्णातीति यादृशः[30] परस्तादृश एव भविष्यतीति व्यर्थ रूपग्रहणमिति चेत् । न क्वचिद् भाव्यमानोप्यण् सवर्णान् गृह्णातीति ज्ञापनार्थत्वादमूभ्यामित्यादिसिद्धये इति। तदसत्। पर इति यत्युक्तेऽपि सिद्धस्य परस्य विधेयत्वासम्भवादवश्यं परशब्देनाकृतिः सादृश्यं वा लक्षणीयं तत् चानुनासिकादिसाधारणं न चात्यन्तसादृश्यान्निरनुनासिकयवलक्षयिष्यत इति वाच्यम् । आत्यन्तिकत्वलक्षणे प्रमाणाभावात् सादृश्यमात्रलक्षणयापि विध्युपपत्तेः । अत्र चार्थे रूपग्रहणमेव ज्ञापकम् । गमेरप्यभ्यामित्यादौ तु दिव उदिति[31] तपरत्वं ज्ञापकं भाव्यमानोप्युवर्णः सवर्णान् गृह्णातीति। तदप्युवर्णमात्रविपर्यानाण्मात्रविषयम्। तथात्वे हि त्यदाद्यत्वमिदमो मस्य सानुनासिकं प्रसज्येतेति। तस्माज्जनेर्ड वचनं ज्ञापकं न व्यञ्जनस्य गुणो भवतीति प्राप्तेराह भाष्यकार: नैतदस्ति ज्ञापकं गमेरप्ययं डविधियते गमेश्च गुण उच्यमान आन्तर्यत आकार: स्यादिति। विवृतं च कैयटेन सप्तम्यां जनेर्ड[32] इत्यतोऽन्येष्वपि दृश्यत इत्यत्र डोऽनुवर्तमानो गमेरपि विधीयत इत्यज्ञापकं डित्वमिति।

नन्वन्येष्वपि दृश्यत इति वार्तिकेनेति भाव इति यथा परितः खाता परिखेति उपपदान्तरे धात्वन्तराच्च डो भवत्येवं न गोगः गुरूतल्यगः । अभ्युद्गसमुद्ग इति गमेरपि भवतीत्युक्तं भवति। ननु कथमसौत्रं गमेर्डविधानं सौत्रस्य डित्वस्यावकाशः स्यात्।

अत्राहुः- व्यञ्जननिवृतौ च सप्तम्यां जनेर्ड इति सौत्रमेव डविधानं जनावनों कं सद् गमे रपि एनं कल्पयति । न च डित्करणस्य व्यञ्जनगुणनिवृत्तिज्ञापनेनापि चरितार्थत्वात्कथमस्यान्यतस्तत्कल्पनेति वाच्यम् । शास्त्रान्तरप्राप्तिव्यवहितगुणनिवृत्तिकल्पनापेक्षया स्वस्यान्यतो विधि कल्पने लाघवान्। न चैवमन्येभ्योऽपि दृश्यत इति वार्तिकवैयर्थ्यम्। डविधिसामर्थ्य प्रपञ्चार्थत्वाता वस्तुतस्तु अन्येष्वपि दृश्यत इति सूत्रेणैव गमे? विधीयत इति यथा श्रुतं कैयटोक्तमेव साधीयेत विवरणोक्तं यात आह वृत्तिकृत् । अपि शब्दः । सर्वोपाधिव्यनिवारार्थम्लेन धात्वन्तरादपि भवति। परित खाता परिखा आखेति तेन दृश्यपि ग्रहणसूचितम् एवार्थोवार्तिकेन विवृत इति न गमेर्ड स्यात्सौत्रत्वं शंकनीयम् । अतो नैतडित्वं ज्ञापकमिति स्थितम् । तदेतन्नरोचयामहे। यतो नानेन गमे ? विधीयतेऽपितु गमश्च अन्तात्यन्ताच्चेति प्रकरणपठितेनान्यत्रापि दृश्यत इति वार्तिकेन स यथा ग्रामगः नगरगः गुरूतल्यगः इत्यादौ भवत्येव[33] मगोनगः आयुद्गः समुद्ग इत्यादाव पिष्यति तत्कथं न नेटुंविधानमलिङ्गम् ।

यत्तवन्तात्यन्ताच्चेति डप्रकरणमन्येभ्योऽपि दृश्यत[34] इत्यस्य प्रपञ्चार्थम इत्याहुः। तच्च तथा सति जनेर्ड इत्यस्य भूते विधानाद् गमेरपि डो भूत एव स्यान्न कालान्तरे दृश्यते च ग्रामं गच्छत्यपि प्रमग इति प्रयोगः । न चैवं नगः गुरूतल्पग इत्यादौ भूते डो न स्यादिति वाच्यम्। अन्तेत्यादिप्राकरणिकस्य डस्य कालत्रयेऽपि विधीयमानस्य यथाभिधानं भूतेऽप सुलभत्वात् । अत एव कालभेदेन विधीयमानयोरनयो न प्रपञ्चप्रपञ्चिभावसम्भवः। तथा हि सति प्रकरणभेदोऽनर्थकः । स्यात्। एकप्रकरणे हि पुनर्डग्रहणं न कर्तव्यं भवतीति लाघवमपि संपद्यते।

यत्तूच्यते अन्येभ्योऽपि दृश्यत[35] इति दृशिग्रहणादपि ग्रहणान्वयथाकारकान्तरे परितः खाता परिखेत्यादौ भवत्येवं कालान्तरेऽपि भविष्यतीति युक्तः प्रपञ्चप्रपञ्चिभाव इति तदसत् । अन्तादिप्रकरणोक्तप्रतिपदोक्ते सार्वकालिकत्वाद् भूतेऽपि डे सम्भवति दृश्यपि ग्रहणानुसरणरूपन्नस्नास्त्या श्रयणस्यानवसरात् दृश्यपि ग्रहणादिप्रपञ्चिभाव इति कं हि यत्रार्थे प्रतिपदोक्तं लक्षणं नास्ति तत्संग्रहाय प्रवर्तते

अन्यत्र संभवति च कालभेदेनोभयोः स्वातन्त्र्यप्रपञ्चतापि नोचिता निर्थकानुवादकल्पनायाः आनर्थक्य परपर्यायत्वात्। अथ सतमन्तात्येतेतिङ् प्रकरणं करिष्यते।

अन्यथा गमिडप्रकरणे ग्रामग सिद्धयेऽन्यत्रापि दृश्यत इति। जनिड प्रकरणे च परिरवेत्येतत् सिद्धयेतेभ्योऽपि दृश्यत इति वक्तव्यं स्यात् इति तन्न। यत उच्यत एन्यास एव। उक्तस्यापि शब्दादिनान्यथासिद्धा लाघवं संपादयनात्मनः शास्त्रस्य च महदेव माधवमापादितं महतो महतः प्रकरणस्यादावेकतमपि ग्रहणं कृत्वा तदकृत्वा च कृती भवेदाचार्य[36] इति। एवमपि प्रपञ्चत्वेऽन्यत्रापि दृश्यत इत्यस्यैव सप्तम्यां जनेर्ड[37,38] इत्यादिप्रकरणे प्रपञ्चः किं न स्यात्। तत्रापि दृशिग्रहणात्परिखेत्यादौ धात्वन्तरादपि भूतेऽपि जनेरपि डस्य सुकरत्वात्। नन्वस्त्वेवमेवमपि पूर्वोत्तरविहितो एक एवेति डित्वमलिमिति। तावत्सिद्धं नः समीहितमिति चेन्न। एवं हि गमश्चेत्यपि कृत्य गमेर्डविधानं प्रायमकल्पिक जनेस्त्वपि शब्दादिना भूदिति। तथा च गमेरप्ययं डो विधीयत इति भाष्येऽपि नागमेरन्वयो विरूध्येत[39]। ननु तदुद्धातव्यम्। अत एवापि ग्रहणं सर्वो हि प्रधानमन्वीयते। तदेवमन्येऽपि दृश्यत इत्यनेन गमे? विधीयत इत्येतच्छिष्य बुद्धिपरीक्षा मात्रार्थ मुक्तं भगवता ननु तच्छब्दातव्यम्।

अत एवाचि ग्रहणं सर्वोपाधिव्यभिचारार्थ तेन धात्वन्तरादपि भवतीत्यभिधाय वृत्तिकृता खनेरेव परिखेत्युदाहृतम्। न तु गमेः किञ्चित्। अस्तुवागमेरप्यनेन ड तथापि डित्वमनर्थकं गुणेन मकारस्यार्धमात्रस्य मात्रिकेकारे कृते उपसरज इतिवत्सिद्धेः।

## स्थानकृत आन्तर्यस्य बलीयस्त्व विमर्शः।

ननु स्थानत आन्तर्यस्य बलीयस्त्वादोकारः स्यादिति चेन्न। गमे? इति डो वचनं ज्ञापकं न मकारस्य गुणेनोकारो भवतीति अन्यथा विषमेव[40] विदधीत। तत्र च मकारस्य गुणेनौकारेऽतोगुण[41] इति पररूपेण गोरूपसिद्धेः। किं डो विध नेन एवञ्च कृत्वा इदमपि डो प्रत्ययस्य डित्वं ज्ञापकं न व्यञ्जनस्य गुण इति कथं ओ इत्यपि प्रत्यये कृते मकारस्य गुणेनाकारे पररूपे च गोरूपसिद्धेः[42]। ओकारस्तु गुण न भवति। तथा सति विषमेव कुर्यादित्यनन्तरमेवोक्तत्वात्। किञ्च तनोतेर्ड उ सन्वच्चेति विकरणान्न व्यञ्जनस्य गुणो भविष्यति। अत्र हे चारूतम् असति डित्वेडकारोच्चारण सामर्थ्यात्पररूपं बाधित्वा सवर्णदीर्घः स्यात्।

अन्यथा हि डमात्रमेव विदध्यात् गुणेन तित उ इति रूपसिद्धेरिति। तदसत्। तस्यान्तर्यतोऽनुनासिके गुणेऽकारे कृते तस्य पररूपेण शुध यर्थमकारस्यार्थवत्वात्।

दीर्घार्थातात्वस्यत शक्या कल्पयितुम[43] परेण पररूपेणैव तस्य साधनात्[5]।

न च पररूपेऽकारकरणव्यर्थ शुध्यर्थत्वादित्युक्तेः। किन्त्वसत्यकारे उप्रत्ययेन सहाद गुणः स्यात् अतो विगृहीताकारोच्चारणमर्थवत्। यत्तु वदन्ति भूभृशात् चरिन्सरितनिधन्निमित्तस्त्रिभ्यं चरित्यस्यान्ते योद्धेवेत्यस्यानन्तरं तनोतेर्लोप उ सन्वच्चेति वक्तव्यम्। ततो दुरीणश्चरमिति ततः सापि तन्वीति रक्त प्रकरणमस्तु। तत्र प्रत्ययेऽनुवर्तमाने तनोतेः पुनरूप्रत्ययोपादानसामर्थ्याद्

आदुणो न भविष्यतीति। न लोपेन शुद्धाकारश्रवणं च सेत्स्यतीति तदसत् । एवं हि कुर्मश्चेत्यत्र यो देवेति द्विग्रहणं न सम्बध्येत् । रक्तप्रकरणेन[44] व्यवायात्। किञ्च उरिति वर्तमाने कुर्मश्चेति प्रत्ययान्तरकरणं धान्ये निरिनिवर्तसाननिद्धहणनिवृत्यर्थमिति स्थितं ततश्च ततः प्राक् रक्तप्रकरणकरणे तत्रापि डित्वं सम्बध्येत। उप्रत्ययान्तकरणमेव निवर्तकमिति चेत् । हन्तैवं विकारनिवृत्यर्थत्वं दुर्लभं सामर्थ्येऽपि क्षयात् । अथ कुप्रकरणान्त एव तनोतेर्लोप उ सन्वच्चेत्युक्तादुरीणश्चरगित्यादि उच्येत एवमपि कुप्रकर प्रारापादुग्रहणानुवृत्तेः पुनरूग्रहणमिति कथं विकारनिवृत्यर्थ तस्मादिति। यदपि सति गुणे सन्वद्धावेदेशादस्तु न गमादिभिः दीर्घः स्यादिति। न च तदप्यनिर्दिश्यते सामान्यातिदेशे विशेषानतिदेशात्।

यपि डित्वेन नियतिदरिद्रातित्य इतीट् वलादिलक्षणेन स्यात् । न च सनीव सन्वदिति सप्तम्यं नाद्वति विज्ञायते इट त सति पर इति नाभविष्यतीति वाच्यम् । सन्यङो[45]रिति षष्ठी व्यायाम च सनीव सन्वदिति प्रसङ्गात्तदपि हि सनन्तस्य विधीयते न सनि पर इति।

न च षष्ठयन्तावृतौ सत्वादित्वासंग्रहः । षष्ठयाः सम्बन्धमात्रार्थलाघत्सनं कार्ये यच्च सति मदुभयस्यापि सङ्ग्रहात्। एतेन तनोतेः विभाषेतिः[46] विशेष विहितो दीर्घविकल्पोऽपि प्रत्युक्तः । वलीत्यनुवृत्तेर्तत्रापिसत्वात् । तथा च तित नि षतीतीट् पक्षैः न भवति यदप्युक्तं-अ उ र् द्विश्चेति वक्तव्ये सन्वच्चेत्यति देशसामर्थ्याद् विशेषकार्यस्य रूत्वादिलक्षणदीर्घस्याप्यतिदेशः स्यादिति तदप्यसत्। अरूरूद्विश्चेत्येतावत्युक्ते सन्नहीवानतिदेशे सन्यत इतीत्वसिद्धेः। यत्तु सन्वदित्यक्तेऽपि प्राधान्यात्कार्यातिदेशेनेनैव द्वित्वे षाष्ठद्विर्वचनांपेक्षाभ्याससंज्ञा भावादित्वं न प्राप्नोति । अथातिदेशसामर्थ्यादित्वं भवति तर्हि दीर्घोऽपि स्यादिति। तन्ना अभ्याससंज्ञायां धातोरित्यनवत्तेः धातद्वित्वमात्रविषयत्वात। अन्यथा द्युतिगमिजुहोतीनां द्वेवेति जातीयेऽपि द्वित्वेऽभ्यासकार्य न स्यात। तत्कथमित्वप्रसङ्ग सामर्थ्यमप्ययुक्तम् । द्वित्वेनाप्युपक्षीणत्वात् ।

अस्तु वा शास्त्रातिदेशः तत्र न चाशंकानवोत्तरं तस्मात् इट डित्वं ज्ञापकमेव न व्यञ्जनस्य गुणो भवतीति। यत्तु न व्यभिधानम् । तथापि जुसि[47] गणो व्यञ्जनेति प्रसज्येत् । ज्ञापकस्य गुणमात्रविषयत्वे प्रमाणाभावादिति तत्रा न्यैरूक्तानां ज्ञापकानां गुणमात्रविषयत्वे यत्प्रमाणं तदेवात्रापि भविष्यति स्तमित्येव दष्यमिति चेत् । असूयामात्रमेतत् । यत्तु डारौरस[48] इति डित्करणं ज्ञापकमन्यथा तासे सस्यान्तरतमत्वाद् गुणोऽकारे सवर्णदीर्घ च सिले स्याल्लवितेति। तत्र आत्मनेपदार्थत्वात् तत्र ङित्वे क्ङिति चेति[49] निषेधात् । न हीक्परिभाषा नारम्भे इक एव निषेध इत्यस्ति। एतेमनासरूपोर्लोप इति सादौ सस्य लोप वचनं व्यञ्जनस्य गुणाभावे ज्ञापकं स्यादित्यपि नास्ति। तदेवं ज्ञापकान्न व्यञ्जनस्य गुणः निर्देशाच्च । यदयं यातिवाति ध्यायते सम्प्रसारणं च उयति वहतीति निर्दिशति। तत ज्ञापयति नात्सन्ध्यक्षरव्यञ्जनानां गुण इति। अत एव रैवोस्तौ शब्दानामाचार क्विबन्तानां दशादौ गुणप्रसङो न। अनाभधानाच्च । यत्तु न चकास् तृजन्तानामनभिधानेऽपि गुणमात्रानभिधानस्य दुर्विज्ञानत्वात् । ईदृशसमाधानस्य सर्वत्र सुकरत्वाच्च ।

न वाचारक्विबन्तानां तजादावनभिधानादगुणे नेत्यर्थः । अत एवेत्यय चस्य वानर्थक्यप्रसादिति। तन्न। अनभिधानादेभ्यः क्विवेव नोत्पद्यत इत्यभियुक्ताभिधानाद्यव्यभिपधानमस्तीति हरदत्तेन यद्युपनिषेधानेभ्यः क्विबेव नास्थिनवतसन्तरेणैषां धातुत्वं न वा तदृते तृजादय

इत्यवधारिते कथं दुनित्वमिति न विदमः। यत्तवाचार क्विबन्तस्य शब्दस्याभिधानमस्ति नैषामिति विशेषस्य नाशयत्वादिति। तदपि समानमीहमानानामिति न्यायादैतिहायमाण कत्वाच्चोपेक्ष्यम्। आनर्थक्यप्रसादित्यपि कथञ्चिदभ्युपेत्याभिधानम्।

प्रथमो हेतुः। अन्यथा त्वपर इति व्यस्थिते। तत्समुच्चयार्थश्च चशब्दोऽपि न व्यर्थः। यदपि ध्यायतेरिति प्रयोग: पूर्वसमाधानसमाहित एवेति तस्यात एवेत्यभिहितं हेरूत्वमपि न संगच्छत इति। तत्तुच्छं उपायस्योपायान्तराविरोधि त्विात्। प्रत्यक्षपरिकलितमप्यर्थमनमानेन बुभुत्सन्ते तर्करसिकाः। यदपि प्रयोगज्ञापकानि च नियातनत्वेनाप्युपपद्यन्ते तथा च बाधकान्याय निपातनानि भवन्तीति पक्षे वचनमावश्यकं पक्षान्तरेऽपि ज्ञापकसिद्धं न सर्वत्रति इति । तदतद् चात्वभाषित्वं पयोगतापकमात्रोच्छेदापत्तेः । सवनामा। कल्पोरदन्तत्वनिपातनमित्येवमादीनामप्यबाधकत्वेऽसार्वत्रिकत्वे वचनारम्भप्रसङ्गत्।

कि तमिसभालामपि पारिभाषिकमनित्य स सुबद्धं भवतीति आत्संन्ध्यक्षराणामपि गुणादिप्र वचनान्तरमारम्भणीयं स्यात्। पारिभाषिकमनित्यं सकृत्बद्धमेव द्वन्द्विर्बद्धं सिन्ध्यक्षराणामपि गुणादिप्रसंगाशङकया तन्निवृत्यर्थे

अथेष्ट सिध्यनुरोधेन क्वचिदेवानित्यात्वमाश्रीयते न यत्र तत्र तर्हि प्रकृतेऽपि समं समाधानमन्यत्राभिनिवेशेशात्। एतेन भाष्यकृतात्वे यत्तूऋक्षिकान् कृता व्यञ्जननिवृत्यर्थमग्रे इग्रहणस्यास्यात्येवेत्यभिप्रायेण उणादिषु व्युत्पत्तिपक्षेष्वपि स्वयमावृतत्वादुढ डित्वं च ज्ञापकं नावृतत्वादुढ डित्वं ज्ञापकं नावृतम्। व्युत्पत्तिपक्षे च बहुलग्रहणात्तत्र गुणप्रवृत्तेरपि संभवात् इति यदुक्तं तदपि परास्तम्। एतेन ज्ञापकस्य सार्वत्रिकत्वात् दापयतीत्यत्र पुगन्तगुणोऽपि[50] प्राप्नोति। अत एव भाष्यकृत डवचनं ज्ञापकं खण्डयित्वा पुनर्जापकोत्तरं न समीचीनमिति अपास्तम्।

अस्तु दापयतीत्यात्रापि गुणः पुनः प्रसविज्ञानाद् वृद्धिः भविष्यति। गुण एव चात भविष्यति। सन्निपातपरिभाषया पुक आकारसन्निपातलक्षणत्वेन गुणप्रवर्तकत्वात्। यदपि हेचारूतं निर्देशेन सूत्रप्रत्याख्याने आकारस्य गुणो न भवतीत्यादिवाक्यशेषानुमाने वचनस्यातिभारो भवतीति। किञ्च जप: करणे भवतेर: रायः नाव इत्यादि निर्देशेन एचोऽयवायावः [51] इत्यनर्थकं स्यादिति। तदसत्। अत्रैवात्सन्ध्यक्षरव्यञ्जननिवृत्यर्थमुपन्यस्तैर्भाष्यकारीयज्ञापकैः अलत्वाभावार्थेन प्रत्यय इत्यादिनिर्देशैश्च समानयोगक्षेमत्वात्।

किञ्च प्रधानं कार्य शास्त्रस्य प्रमेयं तदर्थमेव तत्प्रवृत्तेः तस्मिंश्च स्वलक्षणोत्पन्ने प्राप्यव्याप्तिपरिहाराय ज्ञापकाद्युपास्यते न प्रकारोत्पन्नये। इक्परिभाषापि[52] न गुणाद्युत्पादयति किन्तु नियच्छति सचनियमो यद्यन्यतः सिद्धम्। किं तयोरतिदृष्टान्तदार्ष्टान्तिकयो वैषम्ये। यद् वा प्रत्यक्षविधौ सामान्यलक्षणक्रीडाकृतानेकविशेषपरवाक्यानुमाने प्राप्ते क्वचिद्ज्ञापकेन स्वविषये । श्रुतार्थापत्या बाधितविषयत्वात्तद्विषयकविशेषविध्यनुमानप्रतिषेध एव क्रियते न पुनः निषेधबाधमनुमीयते अपूर्वविधौ तु वाक्यानुमानमावश्यकमिति महत्वैषम्यम्।

वस्तुतस्तु सर्वत्रापि गुणवृद्धि विधानाङस्ये त्यादिषष्ठीरूप लिादलोन्त्यस्येतिवत्स्थानेऽन्तरतम[53] इति अस्यामप्युपस्थानादेकवाक्य तयाड़,स्ये त्यस्यान्तरतमे गुणवृद्धी भवति इति वाक्यार्थ पर्यवसानात्स्थानेऽन्तरत[54]माभ्यामैव गुणवृद्धिभ्यां भवितव्यम्। एवञ्च उम्भिता शंकिता

अर्रिता अदिता यतिता च पूता अनेनिजुः अभैत्सीदित्यादिषु अलोन्त्यस्येत्यन्त्यस्य विधीयमानाः सार्वधातुक जुसि गुण सिचिवृद्ध्यादयः क्विचित् स्थानभेदात् क्वचित्स्थानसाम्येऽपि प्रयत्नभेदात्।

अनान्तर्याद् व्यञ्जनस्य भविष्यति। न वचनाद् भवितव्यम् । नेता अनैषीदित्यावन्तरतमेव च तस्य[55] चरितार्थत्वात् । न चान्यतरान्तर्यमाश्रित्य कित् प्रसङः। नेतेत्यादौ स्थानप्रयत्नोभयान्तरतमसंभवेऽन्यतरग्रहणे प्रमाणाभावात् । तमग्रहणादनेक विधान्तरसंभवे तस्यैव न्याय्यत्वात्अन्यथा स्वर्णयति इत्यत्र रेफस्य स्थानत आन्तर्यादनुनासिको ण स्यात्।

न च नेता अनैषीदित्यादावेव स्थानगुणप्रमाणे स्त्रिभिरव्यान्तर्यसंभवाच्चेत् । अचैषीदित्यादौ प्रमाणानान्तर्यान्न स्यात् इति वाच्यं सन्वस्यचः क्यरवः क्वौश्च कित्करणात् प्रमाणकृतान्तर्यस्य विवक्षणात् कथं तान्तर्यतोऽर्धमात्रस्यानकारस्य । मात्रिकोकारो भविष्यति इत्युच्यते स्थान प्रयत्नानान्तर्याद्वचनस्यान्यत्र चरितार्थत्वात् व्यक्तिपक्षे च नानाविधिकल्पने प्रमाणाभावाच्चेति चेत् । न ह्यत्रपर्यनुयोग विषयः किन्तु येऽन्तरमपरिभाषामाश्रित्य तमग्रहणप्रयोजनं शतशः समुद्घोषयन्तो निर्विचिकित्समेवेषदतित एव प्रवृत्य[56] दिव औदि[57]त्यादो त्वनन्तरोऽपि वकारस्यौकारो वचनाद् भवति। षडित्यादौ च जश्त्वेन डत्वं षडित्यादि निर्देशसामर्थ्याद् भवति । एवमन्येष्वप्यूह नीयम् । अथ इशिता इहितेत्यत्र शकार हकारयोस्तालव्यकं व्ययोर्विवृतयोस्तादृशावेकाराकारौ स्याताम् ।

नैष दोषः। तयोभिन्नप्रयत्नत्वात्। तथा हि स्पृष्टं करणं स्पर्शानां ईषत्स्पृष्टमन्तस्थानां ततो विवृतमूष्मणामिति ईषदिति वर्तते उष्मणामीषद् विवृतं ततः स्वराणां च ईषदिति निवृत्तं स्वराणां विवृत्तमिति हि शिक्षार्थः । एवञ्च हलयोर्भिन्नप्रयत्नत्वादनान्तरतम्यादगुणवृद्धीनां न भविष्यत अवश्यं चैतदेवं व्याख्येयम्। अन्यथा दीर्घहलोऽसावर्ण्यनिषेधस्योक्तत्वाद्वकारेणकारस्यापि ग्रहणात् तस्येण्त्वाद् भूयालुरित्यत्रादेशप्रत्यययोरिति यत्वं स्यात् । न च भागवीप्सासु इत्यादिनिर्देशात् षत्वाभावः। नेह प्रत्यारम्भे विश इत्यादिनिर्देशादकारहकारयोरिकारशकारयोश्च सावाभावे सिद्धेन हलाविति सावर्ण्यनिषेधवैयापातात् । सौत्रत्वादपि निर्देशोपपत्तेश्च । न चैवम् । हलोभिन्नप्रयत्नत्वे तथापि न व्यर्थमेव स्यादिति वाच्यम्। इष्टापत्तेः तथा च भाष्यं सिद्धमन इत्वादिति। सूत्रप्रत्याख्यानमेतदिति च बहूभिर्व्याख्यातम् । सूत्रप्रत्याख्याने प्रवृत्तस्य सूत्रान्तरानर्थक्यप्रसड़ो न दोषाय। न च नोक्तत्वावित्वस्यारम्भपक्षे योगविभागव्याख्या नानाश्रयणात्स्थानप्रयत्नान्तर्येणे हितेत्यादौ प्रसड़ इति वाच्यम्। अनिष्टकारिणस्तस्यैवानाश्रयितुं नोचितत्वात् योगविभागस्य सूत्रारम्भपक्षेप्यावश्यकत्वात् च सूत्रद्वयानारम्भसिद्धेर्महालाघव बाधकत्वात्। तथा च व्यञ्जनानां भिन्नप्रयत्नत्वादनन्तरतमत्वादन्त्यस्य विधीयमाने गुणवृद्धी चरितार्थत्वादीहितेत्यादौ व्यञ्जनस्य क्वापि न भविष्यतः । आत्सन्ध्यक्षरयोस्तु निवृत्तिरूक्तैष भाष्ये । यत्तु व्यक्तिनिर्देशपक्षे व्यञ्जनस्य गुणः प्राप्नोति तन्निवृत्यर्थ सूत्रमिति न व्यभिधानम् । तदसत् । अनर्थकारिणो गरीयसश्च व्यक्तिपक्षस्यैव नायितुमुचितत्वात् ।

यत्तु स्थानित्वमादेशत्वं परत्वं च व्यक्ताविव मुख्यमिव **सर्वत्र व्यक्तिपक्ष एवाश्रीयते।** क्वचिदेव लक्ष्यानुरोधादाकृतिपक्ष[58] इत्युक्तं तन्न। विपरीतं जातौ शक्तिरिति पक्षे शब्दार्थत्वेनाकृतेरेव मुख्यत्वाद[59] व्यक्तीनामानन्त्यव्यभिचाराभ्यावाच्यत्वेन लक्ष्यत्वात्

विशिष्टशक्तिपक्षेऽपि प्रथमोपस्थितेऽन्तर काकृत्यवलं विशास्त्रप्रवृत्तौ लघुत्वाद् व्यक्तिपक्षे चाननुगतानेकविधिकल्पने आवृत्तिकल्पने चातिगौरवप्रसादगत्याकृतिरेव तदाश्रयणमिति सर्वशिष्टानुशिष्टत्वात्।

न चेह तथा काचिदगतिरस्ति। प्रत्युतन्याय्यत्वादाकृतिपक्षे लघुन्याश्रिते इक्परिभाषाप्यनारम्भणीया भवतीष्टमपरं सिध्यति। प्रयोजनानुरोधेन ह्यन्यतरपक्षपरिग्रहः शास्त्रेनानिष्टं गौरवं शास्त्रारम्भं च पादयितुम्। ननु यद्यन्तरतम इति तमग्रहणादत्यन्तसादृश्यमाश्रीयते तर्हि स्थानप्रयत्न वत्प्रमाणस्याप्याश्रयणान्नेता अनैषीदित्यादावेव स्थानगुणप्रमाणैरपि आन्तर्यसम्भवाद्गुणवृद्धिः स्याताम्।

ननु चेता अचैषीदिति प्रमाणत आन्तर्याभावात्। कर्ता कारक इत्यादौ च अकारस्याकाराकारौ स्थानप्रयत्नसामीप्यसदृशाविति न स्याताम्। ततश्च यथा चेतेत्यादौ प्रमाणभेदेऽपि कर्तेत्याकारक इत्यादौ स्थानप्रयत्नभेदेऽपि प्रमाणसादृश्याद् रेफवत्वसादृश्याद्रेफवत्वसादृश्याच्च गुणवृद्धी भवत एवं व्यञ्जनस्यापि तत्प्रमाणसादृश्यात् कथं न स्यातामिति चेत्। सत्यम्। अविशेषेण चतुर्विधान्तर्योपस्थितावपि स्थानप्रयत्नोभयकृतमेवान्तर्ये गुणवृद्धिविधावाश्रीयते न परिमाणकृतमपि क्तोः कित्करणात्। नार्थकृतमप्यत एव एतदुपादान एव चानुपपन्नं कित्वं तदुभयमेव निवर्तयति। तावता चानुपपत्तिशान्ते सतिवलवद् बाधके स्थानप्रयत्नकृतमप्यान्तर्ये नित्यवत् स्थितमपलयितुं शक्यते। न च क्तोः कित्वादन्यतमान्तर्यमेव ज्ञाप्यतामिति वाच्यम्। सामान्यापेक्षा ज्ञापने गौरवादति प्रसाच्च। ऋवर्णस्याप्यनन्तरे गुणवृद्धी भवत इत्यत्र ज्ञापकं सरजिति कित्वं कर्ताकारके इत्यादिनिनिर्देशश्च। यद् वा उरविशेषेण प्रसक्ते ष्णो रपरत्वे कृते आन्तरतम्ये निरूप्यमाणे प्रमाणकृतस्य तस्य प्रागेव निरस्तत्वादसम्भवाच्च रपरत्वस्य परग्रहणेनावयवत्वबोधान्यद्गुणवृद्धिग्रहणेन ग्रहणात् तयोश्च समुदाययोरवयवधर्मारोपा रेफतो मूर्धन्यत्वादकार: तश्च विवृतत्वात्स्थान प्रयत्नोभयान्तर्यमविरूद्धम्।

यत्त्वकारस्य संवृतत्वात्प्रयत्नसाम्याभाव इति। तदसत्। विवृतत्वप्रतिजानात्। न च तत्सवर्णसंज्ञां प्रत्येवेति नियमहेतुरस्ति।

अ अ[60] इति शास्त्रान्तेन पक्षितकार्यविशेषात् प्रत्यापत्तिर्लिंगात् शास्त्रापेक्षितयावत्कार्य निर्वाहाय विवृतत्वस्यानुमानात् ततश्च यथा खट्टे इ इत्यादावयवाद् द्वयान्तर्यात्समुदायस्याप्येकारो गुणः यथा च सभागता पक्षे एकार एवेकारस्य एवमकारस्यारारौ भविष्यतः। किञ्च सत्यामन्तरतमपरिभाषायां तमग्रहणे च जाग्रति कथं न परिमाणत आन्तर्यमाश्रीयते कथञ्च ऋकारस्यानन्तरे अपि गुणवृद्धी भवत इति त्वयापि विशेषे वाच्यः। स एव मयापि यश्चोभयोर्दोषो न तमेकरचोद्यः। अव्यक्तोः कित्वेन गुणवृद्धिविधावन्तरतमपरिभाषानुपस्थितिरेव ज्ञापयिष्यत इति चेता कर्तेत्यादिव व्यञ्जनस्यापि स्यादिति ब्रूषो हन्तैवं सत्यामपीक्परिभाषायामिकारस्याकारोऽपि स्यादिति विशेषत एव ज्ञापकं वाच्यम्। यत्त्वां धाभिधानम्। एङपेक्षाया न्यूनकालत्वान्नकाराकरयोः सादृश्यमवगतम्। मन्दमप्यन्तरसादृश्यान्तराभवान्नापोद्यते यथोत्पन्न व्रीह्यपचादेः व्रीयन्तरामिव प्रक्रान्तस्य पाठस्य गुणानुरोधेन त्यागयोगायोगात् कार्यबलेन प्रतिनिधिः प्राप्नुवत्सदृशनीवारसन्निधौ विसदृशं नोपादत्ते त्वदसन्निधौ तूपादत्त एव। तद्वत् स्थानेऽन्त[61] रतमवचनमपि सादृश्यप्रमाणस्यैव अनुवाद इति। तमवर्थाभावेन न जाडो कर्तव्यमस्ति चातिशयार्थः। समाते वर्णत्वे कालतः प्रत्यासत्तेरिति तदसत्। यरोऽनुनासिकेन तुल्ययोगक्षेमत्वात्। अन्यथा स्वर्नयति इति

रेफस्याणो दुर्वाराः | तत्राकृतिः पदार्थ इति चेत् नेहाप्यसौ दण्डवारितः व्यक्तिरिहेति चेत् । प्रागेव निरस्तमेतत् प्रयोजनाभावादनिष्टकरत्वाच्च ।

किञ्चात्र पक्षे नकारस्याकारो भवतीति वचनव्यक्तेः सामर्थ्यादेव सिद्धेः नान्तरङ्तमभाषाप्रसंग इति दृष्टान्तासंगतिः । अथात्र स्थानिनि व्यक्तिमादेशे चाकृतिविवक्षित्वान्याय्योऽवतार्यते । तदेतदशुद्धं कृत्वा कु बोधं क्रियते । प्रक्षालनाद् हि पड़ स्य दूरादस्पर्शनं वरमितिन्यायात्। दृष्टान्तोऽपि विषमः। काम्ये प्रतिनिधिः। नास्ति नित्यनैमित्तिके हि सः तयोश्चोपक्रमादूर्ध्वत्यागायोगात्स आदृतः। अगत्या न च सेहास्ति विविधाश्चान्यत्र सार्थकः नित्यादेरपि नारम्भे दृष्टः प्रतिनिधिः क्वचित् । नातोऽन्तरतमत्वस्यबाधे न्यायः प्रवर्तते। अतः सिद्धमेत्तन्न व्यञ्जनस्य गुणो भवतीति। यद्येव मिदेर्गुणेत्याद्यावृत्तः सर्वादेशः प्राप्नोति नैष दोषः । मिद इतीकारनिर्देशादित्यनन्तमेवोक्तत्वात् । किञ्च ज्ञापकाद् व्यञ्जनस्य गुण इति स्थितेः परिशेषादिकारस्यैव भविष्यति । अवयवसमूहरूपत्वान् मिदेः । अथ गुणविधाविक परिभाषाभावे तस्यानिग्लक्षणत्वात्। चितं स्तुतं भिन्न[62] छिन्नमित्यादौ क्ङिति चेति[63] निषेधो न स्यात् । नैष दोषः । क्कुक्कुकनो क्तोश्च कित्कारणं ज्ञापकमनिग्लक्षणयोरपि सार्वधातुकादि लघूपधगुणयोर्निषेधो भवतीति। धातुप्रत्ययो कित्वं कृत्वं सजातीयत्वात् धातुप्रत्ययनिमित्ते एव गुणवृद्धि निवर्तयति।

सन्दर्भ ग्रन्थाः -


1. 'इतोऽत्सर्वनामस्थाने' (अष्टा – 7.1.86)
2. 'हस्वस्य गुणः (अष्टा - 7.3.08)
3. 'जसि च' (अष्टा - 7.3.09)
4. 'ओर्गुणः (अष्टा - 6.4,146)
5. सार्वधातुकार्यधातुकयोः (अष्टा - 7.3.84)
6. 'आतोऽनुपसर्गेकः' (अष्टा – 3.2.3)
7. आतोधातो' (अष्टा - 6.4.140)
8. 'सुपि च' (अष्टा - 7.3.2)
9. मूलपाठे शुभंया इति असाधुः, शुभंया इति साधुः ।
10. मूलपाठे सन्निपातविघात इति असाधुः, सन्निपातविघात इति साधुः ।
11. मूलपाठे गुणतिपेधापत्तेः असाधुः, गुणनिषेधापत्तेः साधुः ।
12. मूलपाठे प्रसक्षेत् असाधुः, प्रसज्येत साधुः ।
13. मूलपाठे प्लै इति असाधुः, ग्लै इति साधुः ।
14. मूलपाठे यांतानां सक्वेत्युक्तौ असाधुः, यमरमनमातां सक्वेत्युक्तौ साधुः ।
15. मूलपाठे अन्यद्या इति असाधुः, अन्यथा इति साधुः।
16. मूलपाठे पदिजहार इति असाधुः, परिजहार इति साधुः।
17. 'आदेचउपदेशेऽशिती' (अष्टा - 6.1.45)
18. 'ओतः श्यनि' (अष्टा - 7.3.51)
19. मूलपाठे ग्रहणेवेति वेत् इति असाधुः, ग्रहणेनेति चेत् साधुः ।
20. 'घुमास्थागापाजहा.' (अष्टा - 6.4.66)
21. 'मीनाति मिनोतिदी.' (अष्टा - 6.1.50)
22. मूलपाठे पनिकल्प्य इति असाधुः, परिकल्प्य इति साधुः ।
23. मूलपाठे हेनुकत्वेन असाधुः, हेतुकत्वेन इति साधुः ।
24. मूलपाठे यघोत्तरं इति असाधुः, यथोत्तरं साधुः ।

25. मूलपाठे ध्याख्येति असाधुः, व्याख्येति साधुः।

26. 'सप्तम्यां जनेर्डः' (अष्टा – 3.2.97)

27. 'प्रावृट्शरत्कालादि. (अष्टा – 6.3.95)

28. मूलपाठे पनरूपेण असाधुः, पररूपेण साधुः।

29. मूलपाठे स्थानेन्तनत इति असाधुः, स्थानेऽन्तरतम इति साधुः ।

30. मूलपाठे याहशः इति असाधुः, यादृशः इति साधुः ।

31. "दिव उत्' (अष्टा - 6.1.31)

32. सप्तम्यां जनेर्डः (अष्टा - 3.2.97)

33. मूलपाठे मवत्येव असाधुः, भवत्येव साधुः।

34. 'अन्येभ्योऽपिदृश्यते' (अष्टा – 3.3.130)

35. 'अन्येभ्योऽपि दृश्यते' (अष्टा – 3.2.178)

36. मूलपाठे भवेदावार्य इति असाधुः, भवेदाचार्यः इति साधुः ।

37. मूलपाठे तप्तम्यां जनेर्ड असाधुः, सप्तम्यां जनेर्ड साधुः ।

38. ‘सप्तम्यां जनेर्ड:- (अष्टा – 3.2.97)

39. मूलपाठे विनुध्येत इति असाधुः, विरूध्येत इति साधुः ।

40. मूलपाठे विचमेन इति असाधुः, विषमेव इति साधुः ।

41. 'अतो गुणे' (अष्टा - 6.1.97)

42. मूलपाठे गोनुपसिद्ध इति असाधुः, गोरूप सिद्धेः इति साधुः ।

43. मूलपाठे कन्ययितुं असाधुः, कल्पयितुं साधुः ।

44. मूलपाठे जाघनात् असाधुः, साधनात् साधुः ।

45. मूलपाठे रक् प्रकरणेन असाधुः, रक्तप्रकरणेन साधुः ।

46. ‘सन्यडोः (अष्टा - 6.1.9)

47. 'तनोतेर्विभाषा - (अष्टा - 6.4.17)

48. मूलपाठे जुमि इति असाधुः, जुसि इति साधुः।

49. 'लुट. प्रथमस्यडारौरसः (अष्टा - 2.4.85)

50. 'क्ङिति च' (अष्टा - 1.1.5)

51. 'पुगन्तलघूपद्यस्य च' (अष्टा - 7,3.86)

52. 'एचोऽयवायाव' (अष्टा - 6.1.78)

53. मूलपाठे इकपदीभाषापि असाधुः, इकपरिभाषापि इति साधुः ।

54. मूलपाठे स्थानैनरतम इति असाधुः, स्थानेऽन्तरतम इति साधुः ।

55. 'स्थानेऽन्तरतमः (अष्टा – 1.1.50)

56. मूलपाठे नस्य इति असाधुः, तस्य इति साधुः ।

57. मूलपाठे प्रनृव्य इति असाधुः, प्रवृत्य इति साधुः ।

58. 'दिव औत्' (अष्टा - 7.1.84)

59. मूलपाठे लक्ष्यानुरोधादाकृनि वक्ष असाधुः, लक्ष्यानुरोधादाकृतिपक्षः साधुः ।

60. मूलपाठे युख्यतत्वात् इति असाधुः, मुख्यत्वात् इति साधुः ।

61. 'अ अ (अष्टा - 8.4.68)

62. 'स्थानेडन्तरतमः' (अष्टा - 1,1.50)

63. मूलपाठे मिर्जा इति असाधुः, भिन्नः इति साधुः ।

64. 'क्ङिति च' (अष्टा – 1.1.5)